श्री यज्ञ वराह स्तुतिः

श्री यज्ञ वराह स्तुतिः (भागवते)

ऋषय ऊचुः |
जितं जितं तेऽजित यज्ञभावना
त्रयीं तनूं स्वां परिधुन्वते नमः |
यद्रोमगर्तेषु निलिल्युरध्वरा-
-स्तस्मै नमः कारणसूकराय ते || 1 ||

रूपं तवैतन्ननु दुष्कृतात्मनां
दुर्दर्शनं देव यदध्वरात्मकं |
छंदांसि यस्य त्वचि बर्हिरोम-
-स्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं || 2 ||

स्रुक्तुंड आसीत् स्रुव ईश नासयो-
-रिडोदरे चमसाः कर्णरंध्रे |
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते
यच्चर्वणं ते भगवन्नग्निहोत्रं || 3 ||

दीक्षानुजन्मोपसदः शिरोधरं
त्वं प्रायणीयोदयनीयदंष्ट्रः |
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः
सभ्यावसथ्यं चितयोऽसवो हि ते || 4 ||

सोमस्तु रेतः सवनान्यवस्थितिः
संस्थाविभेदास्तव देव धातवः |
सत्राणि सर्वाणि शरीरसंधि-
-स्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः || 5 ||

नमो नमस्तेऽखिलमंत्रदेवता
द्रव्याय सर्वक्रतवे क्रियात्मने |
वैराग्यभक्त्यात्मजयाऽनुभावित
ज्ञानाय विद्यागुरवे नमो नमः || 6 ||

दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर भूः सभूधरा |
यथा वनान्निःसरतो दता धृता
मतंगजेंद्रस्य सपत्रपद्मिनी || 7 ||

त्रयीमयं रूपमिदं च सौकरं
भूमंडलेनाथ दता धृतेन ते |
चकास्ति शृंगोढघनेन भूयसा
कुलाचलेंद्रस्य यथैव विभ्रमः || 8 ||

संस्थापयैनां जगतां सतस्थुषां
लोकाय पत्नीमसि मातरं पिता |
विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः || 9 ||

कः श्रद्धधीतान्यतमस्तव प्रभो
रसां गताया भुव उद्बिबर्हणं |
न विस्मयोऽसौ त्वयि विश्वविस्मये
यो माययेदं ससृजेऽतिविस्मयं || 10 ||

विधुन्वता वेदमयं निजं वपु-
-र्जनस्तपः सत्यनिवासिनो वयं |
सटाशिखोद्धूतशिवांबुबिंदुभि-
-र्विमृज्यमाना भृशमीश पाविताः || 11 ||

स वै बत भ्रष्टमतिस्तवैष ते
यः कर्मणां पारमपारकर्मणः |
यद्योगमायागुणयोगमोहितं
विश्वं समस्तं भगवन् विधेहि शं || 12 ||

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे त्रयोदशोध्याये श्री यज्ञवराहमूर्ति स्तुतिः |